Time : 3 Hours

# SANSKRIT LANGUAGE II

Subject Code

| H | 4 | 4 | 2 | 6 |
|---|---|---|---|---|

**Total No. of Questions : 55 (Printed Pages : 11) Maximum Marks : 80**

**सूचना :**
- **सर्वे** प्रश्नाः अनिवार्याः एव। यत्र पर्यायः भवति तत्र समानः प्रश्नक्रमाङ्कः स्थापितः अस्ति।
- स्वभाषया उत्तरलेखनावसरे मराठी, हिन्दी, आङ्ग्ल, कोङ्कणी एतासु एका एव भाषा स्वीकर्तव्या।
- अन्येषां **सर्वे**षां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेखनीयानि।
- प्रश्नानाम् अङ्काः स्पष्टतया लेखनीयाः।
- प्रश्नक्रमाङ्कः 1 तः 13 पर्यन्तं वैकल्पिकप्रश्नाः (MCQ) सन्ति।

- **योग्यं विकल्पं चिनुत।**

1. पुनर्मुक्तिः इत्यत्र सन्धिविच्छेदः – 1
   - पुन + र्मुक्तिः
   - पुनः + मुक्तिः
   - पूर्न + मुक्तिः
   - पुन + अर्मुक्तिः

2. सन्धिं कृत्वा लिखत– भरणात् + अपि 1
   - भरणादपि
   - भरणातपि
   - भरणातापि
   - भर्णादपि

3. अरिः अस्य पदस्य पर्यायपदम् अस्ति– 1

- करिः
- कठोरः
- शत्रुः
- हरिः

4. तमः इत्यस्य पर्यायपदम् अस्ति – 1

- अन्धकारः
- प्रकाशः
- तेजः
- प्रयासः

5. क्षीयते इत्यस्य विरुद्धपदम् – 1

- वर्तते
- वर्धते
- क्रियते
- पीयते

6. बहिः इति कस्य विरुद्धार्थकपदम् ? 1

- अधिकम्
- अन्तः
- अहिः
- जहीहि

- **अधोलिखितवाक्येषु रिक्तस्थानानि पूरयितुं योग्यं पदं चिनुत।**

7. वयं दुग्धं .................................... । 1

- पिबसि
- पिबामः
- पिबामि
- पिबाम

8. मीनाः .................................... सन्ति। 1

- नद्याः
- नद्या
- नद्यां
- नद्यः

9. त्वं शीघ्रं .................................... । 1

- वद
- वदतु
- वदामि
- वदति

10. .................................... मधुरं बहु न रोचते। 1

- मया
- मह्यम्
- मम
- माम्

11. अनुशासनम् पाठः कस्मात् ग्रन्थात् सङ्कलितः ? 1

- कठोपनिषदः
- रामायणात्
- तैत्तिरीयोपनिषदः
- मेघदूतात्

12. कालिदासेन रचितं काव्यं किम् ? 1

- प्रतापविजयम्
- महाभारतम्
- स्वप्नवासवदत्तम्
- रघुवंशम्

13. प्रतिमानाटकस्य रचयिता कः ? 1

- माघः
- श्री. भा. वर्णेकरः
- व्यासः
- भासः

14. जनकस्य ................................................................ सीता। (पुत्र + ङीप्) (दत्तपदेन सह प्रत्ययं संयुज्य रिक्तस्थानं पूरयत।) 1

15. सः पौराणिककथां शृणोति। (अधोरेखितपदे कः प्रत्ययः अस्ति।) 1

16. चञ्चल + तल् = ........................................ 1

(रिक्तस्थाने योग्यं पदं लिखत)

- **सूचनानुसारेण वाक्यपरिवर्तनं कुरुत।**

17. अग्रजः सम्यक् कार्यं करोति। (बहुवचने परिवर्तयत।) 1

**अथवा**

क्रमेलकाः कण्टकजालं पश्यन्ति। (एकवचने परिवर्तयत।)

18. दीपावल्याः अवकाशे अहं देहलीं गच्छामि। 1

(लृट्लकारे - भविष्यकाले परिवर्तयत।)

19. प्राचीनग्रन्थेषु इयं सूक्तिः <u>वर्तन्ते</u>। 1

(वाक्यशुद्धिं कृत्वा लिखत।)

20. मौक्तिकानां हारः अस्य समस्तपदं किम् ? 1

21. भव्यमूर्तिः इत्यत्र कः समासः ? 1

- **अधोरेखितपदम् आधृत्य प्रश्ननिर्माणं कुरुत।**

22. <u>मदालसायाः</u> अभिरुचिः अध्ययने अध्यापने च अस्ति। 1

23. <u>संसारे</u> विभिन्नप्रकृतिकाः पुरुषाः सन्ति। 1

- **अधोलिखितगद्यखण्डं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत।**

एतादृशं गणितकाव्ययोः सुमधुरमेलनमवलोक्यतेऽस्माभिः 'लीलावती' नाम्नि ग्रन्थे। अस्माकं भारतभूमौ ख्रिस्ताब्दस्यैकादशशतके भास्कराचार्यो नाम महान् गणितज्ञोऽवर्तत। तेन सिद्धान्तशिरोमणिर्नाम गणितशास्त्रविषयको ग्रन्थो रचितः। ग्रन्थेऽस्मिन् तत्र तत्र पशुपक्षिणां मनोहारीणि वर्णनानि वर्तन्ते। निसर्गस्य अतिरमणीयं वर्णनं पश्यामः एतस्मिन् ग्रन्थे। कविमना एष ग्रन्थेऽस्मिन् शर्करावलिप्तं तिक्तं भेषजमिव नीरसं कठिनं गणितशास्त्रं माधुर्यमुपनीतवानस्ति।

ग्रन्थस्यास्य चत्वारो विभागाः – लीलावती, बीजगणितं, गणिताध्यायो, गोलाध्यायश्चेति। चतुर्ष्वेतेषु विभागेषु 'लीलावती' नाम विभागो लोके ख्यातः। न केवलं भास्कराचार्यः अपितु गणितशास्त्रज्ञाना–मुज्ज्वलपरम्परामेव पश्यामोऽस्माकं देशे।

भारतीयगणितज्ञानस्य आरम्भः द्रष्टव्यश्चेत् वेदकालपर्यन्तम् अवलोकनीयमस्माभिः। वेदेषु तात्कालिकेष्वन्येषु ग्रन्थेषु च गणितीयांशानाम् उल्लेखः विशेषतो दृश्यते। बहूपयोगिनां नैकानां गणितप्रक्रियाणां जन्मभूः भारतमिति वैदेशिकैः विद्वद्वरेण्यैः मन्यते।

**प्रश्नाः —**

24. 'लीलावती' नाम्नि ग्रन्थे अस्माभिः किं अवलोक्यते ? 1

25. भास्कराचार्यो नाम महान् गणितज्ञः कदा अवर्तत ? 1

26. सिद्धान्तशिरोमणिर्नाम ग्रन्थे कानि वर्तन्ते ? 1

27. कीदृशं गणितशास्त्रं भास्कराचार्यः माधुर्यमुपनीतवानस्ति ? 1

28. सिद्धान्तशिरोमणिर्नाम ग्रन्थस्य चत्वारो विभागाः के ? 1

29. वैदेशिकैः विद्वद्वरेण्यैः किं मन्यते ? 1

- **अधोलिखितपरिच्छेदं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत।**

गोमातरं भूतलदेवतां तां त्रायस्व सेवस्व भजस्व भक्त्या।<br>
पूर्णावतारे स्वयमीश्वरेण स्वकर्मणाऽऽदिष्ट इवैष धर्मः॥<br>
रामासु रामानुजवत् परासु मातृत्वबुद्धिं सततं दधीथाः।<br>
पराङ्गना यस्य मता स्वमाता स राजयोगी स च योगिराजः॥<br>
सन्तो वसन्तो विजने जने वा संसेवनीया दृढभक्तिस्ते।<br>
श्रद्धत्स्व तत्सूक्तिषु सर्वथा त्वं श्रेयस्करं नान्यदतोऽत्र लोके॥

**प्रश्नाः —**

30. जिजामाता शिवरायं कां भक्त्या त्रायस्व भजस्व सेवस्य इति उपदिशति ? 1

31. कुत्र सततं मातृत्वबुद्धिः दधीथाः इति उक्तम् ? 1

32. कः राजयोगी योगिराजः च ? 1

33. के दृढभक्तितः संसेवनीयाः ? 1

34. सर्वथा केषु श्रद्धत्स्व इति जिजामाता वदति ? 1

- **अधोलिखितपरिच्छेदं पठित्वा प्रश्नान् संस्कृतभाषया उत्तरत।**

विद्यार्थिजीवनं सदा अनुशासनपूर्णं भवेत्। यदि छात्रः अनुशासितः भवति, तदा तस्मै किमपि दुष्करं न भवति।

छात्रेण सदैव प्रातः सूर्योदयात् पूर्वं उत्थातव्यम्। प्रातःकाले कृतं स्मरणं चिरकालं तिष्ठति। छात्रस्य पठने रुचिः स्वाभाविकी भवेत्। यदि प्रसन्नमनसा पठति, तर्हि परीक्षायां श्रेष्ठान् अङ्कान् प्राप्नोति।

विद्यार्थिजीवने पठनेन सह क्रीडनमपि आवश्यकम्। शुद्धवातावरणे क्रीडनेन शरीरं स्वस्थं भवति तथा मनः अपि पठने एकाग्रं भवति।

यदि विद्यार्थी दिनचर्यानुसारं स्वकार्यं करोति, तर्हि सः जीवने साफल्यं आप्नोति।

विद्यार्थिनः देशस्य भाविनः नागरिकाः। आदर्शः छात्रः देशस्य आदर्शः नागरिकः खलु।

**प्रश्नाः –**

35. छात्रेण सदैव कदा उत्थातव्यम् ? 1

36. शरीरं स्वस्थं केन भवति ? 1

37. विद्यार्थिजीवने साफल्यं कथं आप्नोति ? 1

38. के देशस्य भाविनः नागरिकाः ? 1

39. विस्मरणम् इत्यस्य विरुद्धार्थकं पदं अनुच्छेदात् चित्वा लिखत। 1

- **अधोलिखितानि वाक्यानि कः कं प्रति वदति इति लिखित्वा पाठस्य नाम लिखत।**

40. "अतः परं न मातुः परिवादं श्रोतुमिच्छामि।" 2

41. "अपि श्रुताः भवद्भिः सखीविचाराः ?" 2

42. "कथं विश्वासघातं स्वामिवञ्चनं च शिक्षयसि ?" 2

• **अन्वयपूर्तिं कुरुत।**

43. वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्। 2

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव॥

वैवस्वतः .................................................. नाम ........................................ माननीयः छन्दसां .......................... इव महीक्षिताम् आद्यः ..........................।

44. एकेनापि सुपुत्रेण विद्यायुक्तेन साधुना।

आह्लादितं कुलं सर्वं यथा चन्द्रेण शर्वरी॥ 2

एकेन .................................. विद्यायुक्तेन साधुना .............................................................. सर्वं कुलम् आह्लादितं, .......................... चन्द्रेण ..........................।

• **स्वभाषया उत्तरत।**

45. ब्राह्मणाः कीदृशाः स्युः ? 2

46. दौवारिकः संन्यासिनं मुमुर्षुं बधिरं च किमर्थं कथयति ? 2

**अथवा**

नारीणां विषये ऋतध्वजस्य अभिप्रायः कः ?

47. दिलीपस्य गुणवर्णनं कुरुत। 2

48. हल्दीघाट्यां कीदृशाः शुकाः सन्ति ? 2

**अथवा**

पञ्चमहाभूतानि स्वभावेन कीदृशानि ? देहगतानि कीदृशानि भवन्ति ?

49. **स्वभाषया अनुवादं कुरुत।** 2

ग्रन्थालयस्य विविधाः विभागाः सन्ति। केचन जनाः ग्रन्थालये वृत्तपत्राणि पठन्ति। तत्र ग्रन्थालये भिन्नासु भाषासु मुद्रितानि वृत्तपत्राणि पुस्तकानि च भवन्ति। तेषां वाचनं हितकारकं ज्ञानवर्धकं च।

**अथवा**

अस्माकं जीवने यः समयः अतीतः स तु गतः, अतः तस्य विषये चिन्ता न करणीया। वयम् अवशिष्टं जीवनं परिश्रमेण, सद्व्यवहारेण च सार्थकं कुर्याम। दिने-दिने स्वार्थः न्यूनः भवेत्, परार्थः अधिकाधिकः भवेत्। अस्मिन्नेव सुखस्य रहस्यमस्ति।

50. **स्वभाषया अनुवादं कुरुत।** 3

रूपं प्रसिद्धं न बुधास्तदाहुर्विद्यावतां वस्तुत एव रूपम्।

अपेक्षया रूपवतां हि विद्या मानं लभन्तेऽतितरां जगत्याम्॥

**अथवा**

द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम्।

त्याज्यो दुष्टः प्रियोऽप्यासीत् अङ्गुलीवोरगक्षता॥

51. रघुवंशम् इति विषयमाधृत्य स्वभाषया परिच्छेदं लिखत। 3

**अथवा**

वैदिकसाहित्यम् विषयमाधृत्य स्वभाषया परिच्छेदं लिखत।

52. श्री. भा. वर्णेकरमहोदयस्य विषये स्वभाषया परिच्छेदं लिखत। 3

**अथवा**

पं. अम्बिकादत्तव्यासः इति विषयम् अधिकृत्य स्वभाषया परिच्छेदं लिखत।

53. **संवादपूर्तिं कुरुत –** 4

रमेशः – नलिनीभगिनि! अत्र आपणाः कुत्र सन्ति ?

नलिनी – अत्र समीपे एव .................... सन्ति। भवान् किं क्रेतुम् इच्छति ? वस्त्राणि, प्रसाधनसामग्रीः वा अन्यत् किमपि ?

रमेशः – अहं .................... क्रेतुम् इच्छामि।

नलिनी – कस्य कृते ?

रमेशः – .................... अनुजस्य कृते।

नलिनी – तर्हि म्हापसानगरं गच्छतु। तत्र वस्त्रापणाः बहवः ....................।

54. भवान् चन्द्रेशः, 72, मिरामार-पणजीतः। भवतां विद्यालये आयोजितस्य दशदिनात्मक-सम्भाषणशिबिरस्य विषये स्वानुभवान् वर्णयन् भवान् स्वमित्रं सुरेशं प्रति पत्रं लिखति। पत्रे प्रेषयितुः स्थलम्, दिनाङ्कं, अभिवन्दनं, अन्त्यभागं च लिखित्वा मध्यभागस्य रिक्तस्थानानि पूरयन्तु। 4

................................

................................

................................

................................

................................

अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं विद्यालये संस्कृत-सम्भाषणशिबिरम् आयोजितम् ..........। दश दिनानि वयं संस्कृतेन सम्भाषणस्य .................... कृतवन्तः। समारोपकार्यक्रमे अहं विदूषकस्य अभिनयं कृतवान्। सर्वे जनाः .................... वारं वारं करतलध्वनिम् अकुर्वन्। मम शिक्षिका अपि बहु प्रशंसां अकरोत्।

एतं विषयं पितरौ अपि सूचयतु।

................................

................................

55. मञ्जूषायां दत्तपदानां साहाय्येन संस्कृतेन **चत्वारि**वाक्यैः चित्रवर्णनं कुरुत— 4

**मञ्जूषा—**

| |
|---|
| **जनाः, प्रीतिभोजनस्य, सर्वेषां, आकाशे, स्थाल्यां, भोजनं, परिवेषकौ, आनन्देन, परिवेषयतः, पक्षिद्वयं, अग्रे, विहारं, कुर्वन्ति, जनौ, दृश्यते** |

